रजतजयन्तीग्रन्थमाला-24

# पण्डितराजजगन्नाथस्य प्रातिभं वैभवम्

कैलासपतित्रिपाठी

योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्

# विषयसूची


| क्र.सं. | विषयाः | पृ. सं. |
|---|---|---|
| १. | विनीतो जगन्नाथः | १ |
| २. | जन्मस्थानम् | २ |
| ३. | विद्यावैभवम् | ३ |
| ४. | आश्रयः | ३ |
| ५. | प्रवादनिर्मूलता | ४ |
| ६. | विधिविहितः पण्डितराजपरिणयः | ५ |
| ७. | भगवद्भक्तः पण्डितराजः | ६ |
| ८. | काव्यप्रयोजनम् | ११ |
| ९. | कारणम् | १२ |
| १०. | काव्यलक्षणम् | १४ |
| ११. | काव्यभेदः | १७ |
| १२. | भेदानां लक्षणोदाहरणवैशिष्ट्यम् | १९ |
| १३. | अप्पय्यदीक्षितव्याख्यानप्रत्याख्यानवैचित्र्यम् | २२ |
| १४. | रसः | २५ |
| १५. | अन्याः पण्डितराजकृतयः | २६ |

विलक्षणा प्रतिभा पण्डितराजस्य चरित्रगतां निरवद्यतां द्योतयन्ति। न हि सावद्ये चरित्रे निरवद्या विद्या भवति स्फुरिता।

शृङ्गाररसपेशलानि पण्डितराजपद्यानि तत्प्रतिभावैभवं व्यञ्जयन्ति, नहि चरित्रगतं दौर्बल्यम्। अतो यवनीसम्पर्कदूषणकथा वृथैव भाति।

**अप्पय्यदीक्षित**मधिकृत्य तत्सिद्धान्तप्रत्याख्यानमूलानि कानिचित् प्रकरणानि प्राप्यन्ते। तैः पण्डितराजस्य दुर्विनयमूला काचन प्रकृतिर्न कल्पनीया। यतो हि सत्त्वमूला प्रकृतिः स्वल्पीयसाप्यधिक्षेपेण प्रज्वलिता भवति। यथोक्तं **कालिदासेन**—

> **स्पर्शानुकूला अपि सूर्यकान्तस्—**
> **तदन्यतेजोविभवाद्दहन्ति।**

शान्तः सौम्यस्वभावः माधुर्यमसृणः पण्डितराजः अप्पय्यदीक्षितादीनाम् अवज्ञामूलैरधिक्षेपैः व्यथितः सन् स्वाक्रोशं क्वचित् क्वचित् अभिव्यनक्ति। मुनयोपि कुप्यन्त्यधिक्षैपैः। पण्डितराजो लब्धराजवरप्रसादो निरवद्यविद्यः कथमिव सहतां कस्याप्यधिक्षेपम्। अतः कञ्चिद् व्यक्तिविशेषं निमित्तीकृत्य ये केचन आक्रोशाः पण्डितराजेन व्यक्ताः तत्र हेतुता अवज्ञायाः, न तु प्रकृतेः स्वभावस्य वा। वह्निसंयोगेन शीतप्रकृतिजलं दहति; किन्तु दाहस्तस्य न गुणः स्वभावो वा। एवमेव परकृतोद्वेजकनिन्दावह्नियोगेन मधुर-प्रकृतिः पण्डितराजोऽमर्षभाषया भाषते।

एवं विधेन, सच्चारित्र्येण सौम्यप्रकृत्या विभूषितो जगन्नाथपण्डितनरेन्द्रः न धत्ते केनापि साकं सहजं शात्रवम्।

ईश्वरे परानुरक्तिरूपां भक्तिं धारयन् पण्डितराजो भक्तिरसं विश्लेष्यन् भक्तये काञ्चिद् विशिष्टां श्रद्धां व्यनक्ति।

भगवद्गुणवर्णनाकर्णनद्रुतस्वान्ते भक्ते याऽनुभूतिस्तत्र भक्तिरसत्वं कथन्नाङ्गीक्रियत इत्यत्र पण्जितराज आशेते यन्मुनिवचनभङ्गवैयाकुलीभावप्रसङ्ग आपतति। यतो हि **भरतमुनिना** प्रोक्तं तथा च **काव्यप्रकाशादिग्रन्थे**षूदाहृतञ्च—



राष्ट्रिय संस्कृत संस्थान

56-57, इन्स्टिट्यूशनल एरिया, पंखा रोड,

जनकपुरी, नई दिल्ली-110058